## ॥ श्री विजयींद्रयतिकृत श्री श्रीपादराजाष्टकं ॥

श्रीमद्वीरनृसिंहनामनृपतेर्भूदेव हत्याव्यथां ।
दूरीकृत्य तदर्पितोज्ज्वलमहासिंहासने संस्थितः ।
श्रीमत्पूर्वकवाटनामकपुरे सर्वेष्टसिद्धिप्रदः ।
श्री श्रीपादयतींद्रशेखरमणे भूयात्सनः श्रेयसे ॥ १ ॥

भेरी मंजुळ काहली मुख महा नानाविध प्रोज्ज्वल ।
ध्वांतध्वाननिरस्तवादिनिचयः श्रीवादिराजोस्तुनः ।
सौवर्णामलदंडचामरसितच्छत्रोरुहैमोल्लसत् ।
यष्टिद्वंद्वसुपंचवर्णवसनो भूयात्सनः श्रेयसे ॥ २ ॥

पादत्राणयुगं क्वणत्सुचरणद्वंद्वेन संयोज्यतत् ।
दुश्यास्त्रं पदकंजरक्षणयुगे बंदीकृतं कूजती ।
धीरान्मोचयतेति बंदिषु पुरोगर्जत्सुसिंहासनं ।
गच्छन्मौक्तिक कंचुकोज्ज्वलतनूर्भूयात्सनः श्रेयसे ॥ ३ ॥

नानाशाक सुभक्ष्यपायसघृतं प्राज्यान्न भुक्त्या जने ।
निंदां कुर्वति काननं गतवते यस्मै ददौ श्रीपतिः ।
मृष्टान्नं सघृतं पयोदधियुतं सोपस्कर कानने ।
गोपीनाथपदाब्जसक्तसुमनाः भूयात्सनः श्रेयसे ॥ ४ ॥

चैत्रेमासि कठोरभास्करकरैस्संतप्तगात्राखिल ।
स्वांतेवासिभिरर्थिभिः स्वतपसा निर्माय रम्यं सरः ।
सारामो यतिपुंगवः परिजनानाप्यायया मासया ।
च्छायतोयविहीन काननतलेर्भूयात्सनः श्रेयसे ॥ ५ ॥

त्वं चेन्मां जयसिद्धिचामरधुनीं गच्छाविनोचेत्तदा ।
सन्यस्तोभव पंडितेति सदसी क्षोणीपतेः पत्रिका ।
आलेख्य प्रियशिष्यवर्य यतीनां यत्याश्रमं वादिनं ।
जित्वादापितत्वांश्चतस्य सुमतीर्भूयात्सनः श्रेयसे ॥ ६ ॥

वैराग्यामलभक्तिनिर्मल महाज्ञानादिभाग्योज्ज्वलः ।
श्रीमत् श्रीपतिरंगविठ्ठलपदांभोजः प्रभावं हृदी ।
स्मारंस्मारमहर्निशं निजमानंदाब्धिमग्नो गुरुः ।
लोकानंदकरोरु रम्य महिमार्भूयात्सनः श्रेयसे ॥ ७ ॥

यद्बृंदावनसेवया भुविजनः प्राप्नोतिसौख्यं महत् ।
यद्बृंदावन मृत्तिकापिनिटिले भक्त्याधृता सेविता ।
भोतोच्छाटनकारिणी क्षयमहापस्मारगुल्मादिका ।
नेकव्याधिनिवारणैककरुणिर्भूयात्सनः श्रेयसे ॥ ८ ॥ ॥

॥ इति श्री विजयींद्रयतिकृत श्री श्रीपादराजाष्टकं संपूर्णं ॥